॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

चतुर्थकाण्डे पञ्चमः प्रश्नः

होमविधिनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नमः॑। नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नमः॑॥ या
त॒ इषु॒श्शि॒वत॑मा शि॒वम्ब॒भूव॑ ते॒ धनुः॑। शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय॥ या ते॑ रुद्र
शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी। तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भि चा॑कशीहि॥ यामिषुं॑-
ङ्गिरिशन्त॒ हस्ते॒ ॥ [१] ॥ बिभ॒र्ष्यस्त॑वे। शि॒वाङ्गि॑रित्र॒ ताङ्कु॑रु॒ मा हि॑ꣳसीः॒ पुरु॑षञ्जग॑त्॥ शि॒वेन॑
वच॑सा त्वा॒ गिरि॒शाच्छा॑ वदामसि। यथा॑ न॒स्सर्व॒मिज्जग॑दय॒ख्ष्मꣳ सु॒मना॒ अस॑त्॥ अध्य॑वोच-
द॒धिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक्। अही॑ꣳश्च॒ सर्वा॓न् ज॒म्भय॒न्थ्सर्वा॓श्च यातुधा॒न्यः॑॥ अ॒सौ यस्ता॒म्रो
अ॑रु॒ण उ॒त ब॒भ्रुस्सु॑म॒ङ्गलः॑। ये चे॒माꣳ रु॒द्रा अ॒भितो॑ दि॒ख्षु ॥ [२] ॥ श्रि॒तास्स॑हस्र॒शोऽवै॑षा॒ꣳ
हेड॑ ईमहे॥ अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः। उ॒तैन॑ङ्गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑। उ॒तै-
न॒ँव्विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः॥ नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒ख्षाय॑ मी॒ढुषे॓। अथो॒
ये अ॑स्य॒ सत्वा॑नो॒ऽहन्तेभ्यो॑ऽकर॒न्नमः॑॥ प्र मु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्याम्। याश्च॑ ते॒ हस्त॒
इष॑वः ॥ [३] ॥ परा॒ ता भ॑गवो वप॥ अ॒व॒तत्य॒ धनु॒स्त्वꣳ सह॑स्राख्ष॒ शते॑षुधे। नि॒शीर्य॑
श॒ल्याना॒म्मुखा॑ शि॒वो न॑स्सु॒मना॑ भव॥ विज्य॒न्धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त। अने॑-
श॒न्नस्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑॥ या ते॑ हे॒तिर् मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑। तया॒ऽस्मान्
वि॒श्वत॒स्त्वम॑य॒ख्ष्मया॒ परि॑ब्भुज॥ नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे॓। उ॒भाभ्या॑मु॒त ते॒ नमो॑

बाहुभ्यान्तव धन्वने॥ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्म-न्निधेहि तम् ॥ [४] ॥

(हस्ते दिख्विषव उभाभ्यां द्वाविꣳशतिश्च) ॥ १ ॥

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृख्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमस्सस्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो नमो रुद्रायाततताविने ख्षेत्राणाम्पतये नमो नमः सूतायाहन्त्याय वनानाम्पतये नमो नमो ॥ [५] ॥ रोहिताय स्थपतये वृख्षाणाम्पतये नमो नमो मन्त्रिणे वाणिजाय कख्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नम उच्चैर्घोषाया क्रन्दयते पत्तीनाम्पतये नमो नमः कृथ्स्नवीताय धावते सत्वनाम्पतये नमः ॥ [६] ॥

(वनानाम्पतये नमो नम एकान्नत्रिꣳशच्च) ॥ २ ॥

नमस्सहमानाय निव्याधिन आव्याधिनीनाम्पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानाम्पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणाम्पतये नमो नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानाम्पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नम ॥ [७] ॥ इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विद्ध्यद्भ्यश्च वो नमो नम आसीनेभ्यश्शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ [८] ॥

(कुलुञ्चानाम्पतये नमो नमो ऽश्वपतिभ्य स्त्रीणि च) ॥ ३ ॥

नम॑ आव्या॒धिनी᳚भ्यो वि॒विद्ध्य॑न्तीभ्यश्च वो॒ नमो॒ नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒ नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒ नमो॒ व्राते᳚भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ नमो॑ मह॒द्भ्यः॑ ख्षुल्ल॒केभ्य॑श्च वो॒ नमो॒ नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒ नमो॒ रथे᳚भ्यो॒ ॥ [९] ॥ रथ॑पतिभ्यश्च वो॒ नमो॒ नम॒ः सेना᳚भ्यः से॒ना॒निभ्य॑श्च वो॒ नमो॒ नम॑ः ख्ष॒त्तृभ्य॑ः संग्रही॒तृभ्य॑श्च वो॒ नमो॒ नम॒स्तख्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ नम॑ः कुला॑लेभ्यः क॒र्मारे᳚भ्यश्च वो॒ नमो॒ नम॑ः पु॒ञ्जिष्टे᳚भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒ नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒ नमो॑ मृग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नमो॒ नम॒ः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॑ः ॥ [१०] ॥

(रथे᳚भ्यः॒ श्वप॑तिभ्यश्च॒ द्वे च॑) ॥ ४ ॥

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ नम॑ः श॒र्वाय॑ च पशु॒पत॑ये च॒ नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ नम॑ः कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ नम॑ः सहस्रा॒ख्षाय॑ च श॒तध॑न्वने च॒ नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒ नमो॑ वृ॒द्धाय॑ च स॒ँवृद्ध्व॑ने च॒ ॥ [११] ॥ नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒ नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च॒ नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒ नम॑ः स्रोत॒स्या॑य च॒ द्वीप्या॑य च ॥ [१२] ॥

(स॒ँवृद्ध्व॑ने च॒ पञ्च॑विꣳशतिश्च) ॥ ५ ॥

नमो᳚ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मद्ध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च॒ बुद्ध्नि॑याय च॒ नम॑ः सो॒भ्या॑य च प्रतिस॒र्या॑य च॒ नमो॒ याम्या॑य च॒ ख्षेम्या॑य च॒ नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒ नम॒ः श्लोक्या॑य चावसा॒न्या॑य च॒ नमो॒ वन्या॑य च॒ कख्ष्या॑य च॒

नमः श्रवाय च प्रतिश्रवाय च ॥ [१३] ॥ नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ [१४] ॥

(प्रतिश्रवाय च पञ्चविꣳशतिश्च) ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नम स्तीख्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च ॥ [१५] ॥ नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईद्ध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ [१६] ॥

(वैशन्ताय च त्रिꣳशच्च) ॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृख्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ [१७] ॥ नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ [१८] ॥

(शिवतराय च त्रिꣳशच्च) ॥ ८ ॥

नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च ख्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च

नमो॒ हृद्य्या॑य च निवे॒ष्प्या॑य च॒ नमः॑ पा॒ꣳस॒व्या॑य च रज॒स्या॑य च॒ नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒ नमो॒ लोप्या॑य चोल॒प्या॑य च॒ ॥ [१९] ॥ नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒ नमः॑ प॒र्ण्या॑य च पर्णश॒द्या॑य च॒ नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ नम॑ आक्खिद॒ते च॑ प्रक्खिद॒ते च॒ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विक्षीण॒केभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ आनिर्ह॒तेभ्यो॒ नम॑ आमीव॒त्केभ्य॑ः ॥ [२०] ॥

(उल॒प्या॑य च॒ त्रय॑स्त्रिꣳशच्च) ॥ ९ ॥

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित। ए॒षाम्पुरु॑षाणामे॒षाम्प॑शू॒नाम्मा भेर् माऽरो॒ मो ए॑षा॒ङ्किञ्चनाम॑मत्॥ या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑भेषजी। शि॒वा रु॒द्रस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑॥ इ॒माꣳ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्र भ॑रामहे म॒तिम्। यथा॑ नः॒ शमस॑द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्व॑म्पु॒ष्टङ्ग्रामे॑ अ॒स्मिन् ॥ [२१] ॥ न्ननातु॑रम्॥ मृ॒डा नो॑ रुद्रो॒ तनो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते। यच्छञ्च॒ योश्च॒ मनु॑राय॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तौ॥ मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कम्मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्। मा नो॑ वधीः पि॒तर॒म्मोत मा॒तर॑म्प्रि॒या मा न॑स्त॒नुवो॑ ॥ [२२] ॥ रुद्र रीरिषः॥ मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः। वी॒रान् मा नो॑ रुद्र भामि॒तो व॑धीर्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॥ आ॒रात्ते॑ गोघ्न उ॒त पू॑रुष॒घ्ने क्ष॒यद्वी॑राय सु॒म्नम॒स्मे ते॑ अस्तु। रक्षा॑ च नो॒ अधि॑ च देव ब्रूह्यधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्हा॑ः॥ स्तु॒हि ॥ [२३] ॥ श्रु॒तङ्ग॑र्त्त॒सद॑ꣳयु॒वान॑म्मृ॒गन्न भी॒मम॑पहत्नु॒मु॒ग्रम्। मृ॒डा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो अ॒न्यन्ते॑ अ॒स्मन्निव॑पन्तु॒ सेना॑ः॥ परि॑ णो रु॒द्रस्य॑ हे॒तिर् वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दु॒र्म॒तिर॑घा॒योः। अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृडय॥ मीढु॑ष्टम॒ शिव॑तम शि॒वो न॑ः सु॒मना॑ भव। प॒रमे॑ वृ॒क्ष आयु॑धन्नि॒धाय॒ कृत्ति॒व्ँवसा॑न॒ आ च॑र॒ पिना॑कं ॥ [२४] ॥ बिभ्र॒दा ग॑हि॥ विकि॑रिद॒ विलो॑हित॒ नम॑स्ते अस्तु भगवः। यास्ते॑ स॒हस्र॑ꣳ हे॒तयो॒ऽन्यम॒स्मन्नि व॑पन्तु॒ ताः॥ स॒हस्रा॑णि सह॒स्रधा बा॑हु॒वोस्तव॑ हे॒तय॑ः। तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥ [२५] ॥

(अ॒स्मिङ्ँ स्त॒नुवः॑ स्तु॒हि पिना॑क॒ मेका॒न्नत्रि॒ꣳशच्च) ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः॥ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः॥ ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः॥ ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्॥ ये पथाम्पथिरक्षय ऐलबृदा यव्युधः॥ ये तीर्थानि ॥ [२६] ॥ प्रचरन्ति सृकावन्तो निषङ्गिणः॥ य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ नमो रुद्रेभ्यो ये पृथिव्याँय्येँऽन्तरिक्षे ये दिवि येषामन्नव्वातो वर्षमिषवस्तेभ्यो दश प्राचीर् दश दक्षिणा दश प्रतीचीर् दशोदीचीर् दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तव्वो जंभे दधामि ॥ [२७] ॥

(तीर्थानि यश्च षट् च) ॥ ११ ॥

समाप्ति कोर्वैः

(नमस्ते रुद्र नमो हिरण्यबाहवे नमः सहमानाय नम आव्याधिनीभ्यो नमो भवाय नमो ज्येष्ठाय नमो दुन्दुभ्याय नमः सोमाय नम इरिण्याय द्रापे सहस्राण्येकादश)
(नमस्ते रुद्र नमो भवाय द्रापे सप्तविꣳशतिः)
(नमस्ते रुद्र तव्वो जंभे दधामि)

॥ हरिः ॐ ॥

चतुर्थकाण्डे पञ्चमः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	२७

ॐ